# संस्कृत वार्ता:

दिनाङ्क : 22/04/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- पहलगाम्-भयोत्पादक-आक्रमणस्य प्रथमवर्षस्य अवसरे राष्ट्रस्य श्रद्धाञ्जलिः, वैश्विकनेतारः भारतेन सह ऐक्यभावं दृढीकुर्वन्, भयोत्पादनस्य निन्दां च कुर्वन्तः सन्ति।
- प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रशासनिक अधिकारिणः विकसितभारतस्य निर्माणलक्ष्येन सह सर्वान् प्रयत्नान् योजयितुम् आहूतम्।
- पश्चिम-एशिया-संघर्षस्य मध्ये तैल-प्राकृतिकवातेन्धनस्य अविरामापूर्तिं सर्वकारेण आश्वासितम्। एलपीजी, पी. एन्. जी., पेट्रोल्, डीज़ल् इत्येतेषाम् आपूर्तिः राष्ट्रव्यापीरूपेण स्थिरा अस्ति।
- \वैदिकअनुष्ठानेन सह भक्तानां कृते केदारनाथधाम्नः द्वाराणि उद्घाटितानि। भक्तानां प्रबलसंख्यायां मध्ये प्रधानमन्त्रिणः मोदिनः कृते प्रथमा प्रार्थना अभवत्।
- भारत-ऋतु-विभागेन आगामि-दिनद्वयोः दिल्ल्याः, उत्तरमध्यराज्याणां च अनेकेषु राज्येषु उष्णतरङ्गस्य सञ्चेतना प्रसारिता अस्ति।

---------------------------------------------------

<u>पहलगाम आतङ्क्याक्रमण</u>

पहलगाम आतङ्क्याक्रमणस्य प्रथमवर्षस्य अवसरे यूरोपीय-सङ्घः भारतेन सह ऐक्य-भावं प्रकटितवान्। एकस्मिन् वक्तव्ये यूरोपीयसङ्घः अवदत् यत् गतवर्षे अप्रैल-मासस्य द्वाविंशति-दिनाङ्के आक्रमणे मृतानां षड्विंशति पीडितानां स्मरणे भारतस्य जनैः सह अस्ति। यूरोपीयसङ्घः सर्व-विध-प्रकाराणां भयोत्पादनस्य दृढं निन्दाम् अकरोत्। नवदिल्ल्यां ब्रिटिश्-उच्चायोगेनापि श्रद्धाञ्जलिः समर्पितम् सहैव शान्तेः सुरक्षायाः च प्रतिबद्धतां पुनः दृढीकृतम्। अयं आक्रमणः जम्मू-कश्मीर्-प्रदेशे अभवत्, पाकिस्तानस्य लश्कर्-ए-तैयबा इत्यनेन सङ्घटनेन कृतः आसीत्, यस्मिन् अधिकांशाः पर्यटकाः मृताः। घटनायाः अनन्तरं, भारतं पाकिस्तानाधिकृते

जम्मू-कश्मीर्-प्रदेशे भयोत्पादक-आधारिक-संरचनां लक्ष्यीकृत्य आपरेशन् सिन्दूर् इत्यस्य आरम्भम् अकरोत्।

-------------------------------------------------

<u>प्रधानमन्त्रिणा-प्रशासनिकसेवकः</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रशासनिक अधिकारिणः विकसितभारतस्य निर्माणलक्ष्येन सह सर्वान् प्रयत्नान् योजयितुम् आहूतम्। देशस्य प्रशासनिक-सेवकेभ्यः लिखिते पत्रे, श्रीमोदी, निरन्तराधिगमे, क्षमता-निर्माणे च तेषां प्रतिबद्धतां अङ्गीकृतवान्। सद्यैव समाप्यमाने कर्मयोगी साधनासप्ताहे प्रशासनिक सेवकाः उत्साहपूर्वकं भागग्रहणाय अभिनन्दयन् सः अवदत् यत् अस्मिन् सप्ताहे अधिगमोत्सवे सम्पूर्णे देशे नागरिकसेवकाः उत्साहेन सह सम्मिलिताः अभवन्।

-------------------------------------------------

<u>पश्चिम-एशिया-विवादस्य</u>

अद्य प्रशासनेन उक्तं यत् देशे तैलस्य वातेन्धनस्य च अविरामपूर्तिः सुनिश्चीयते। पश्चिम-एशिया-विवादस्य विषये नवदिल्ल्याम् अन्तर्मन्त्रालयीयं विवरणं सम्बोधयन्ती पेट्रोलियम-प्राकृतिकगैस-मन्त्रालयस्य संयुक्तसचिवः सुजाता शर्मा इत्येषा अवदत् यत्, देशे एल्. पी. जी., पी. एन्. जी., पेट्रोल्, डीज़ल् इत्येतेषां सामान्यपूर्तिं सुनिश्चेतुं सर्वविधोपायानि कृतानि सन्ति। सा अवोचत् यत् गृह्य एल. पी. जी. इत्यस्य आपूर्तिः सामान्यः अस्ति तथा च ह्यः पञ्चचत्वारिंशल्लक्षाधिकानि आरक्षणानि पञ्जीकृतानि तथा च प्रायः एकपञ्चाशल्लक्षानि यावत् गृह्य एल्. पी. जी. इत्येतानि वितरितानि। सा अग्रे अवदत् यत् ह्यः अष्टसहस्राधिक-टन्- परिमितं यावत् वाणिज्यिक-एल्. पी. जी. आवंटितानि। उद्योगप्रवर्धनविभागस्य तथा आन्तरिकव्यापारविभागस्य च संयुक्तसचिवः निधि केसरवानी इत्येषा अवदत् यत्, सङ्कोचितस्य प्राकृतिकगैस् इत्यस्य तथा जैविकगैस् इत्यस्य च अन्तर्गतं वितरणकेन्द्राणां कृते अनुज्ञापत्राणाम् आवन्टन् प्रक्रिया त्वरितीकृता अस्ति।

---

## तमिलनाडु-श्चिमबङ्ग – विधानसभा

तमिलनाडु-राज्ये एक-चरणीय मतदानस्य कृते, पश्चिमबङ्गप्रदेशे श्वः विधानसभा-निर्वाचनस्य प्रथम-चरणीय मतदानस्य च कृते सर्वाः व्यवस्थाः कृताः सन्ति। तमिलनाडु-राज्ये राज्यस्य सर्वेषु त्रिचत्वारिंशदधिक द्विशत निर्वाचनक्षेत्रेषु मतदानं भविष्यति। प्रसारमाध्यमान् सम्बोधयन्ती राज्यस्य मुख्य-निर्वाचन-अधिकारिणा अर्चना पट्नायक् इत्येषा अवदत् यत्, राज्ये सर्वत्र स्थापितेषु चतुःषष्ठ्यधिक पञ्चसप्ततिसहस्र मतदानकेन्द्रेषु प्रायः त्रिसप्ततिलक्षाधिक पञ्चकोट्याधिकाः मतदातारः स्वमतानां प्रयोगं करिष्यन्ति।

पश्चिमबङ्गालराज्ये प्रथमे चरणे षोडशमण्डलानां द्विपञ्चाशदधिकैकशतासनानि समाविष्टानि सन्ति। राज्ये द्वितीय-चरणस्य मतदानम् अस्मिन्नेव मासे ऊनविंशति दिनाङ्के भविष्यति।

---

## केदारनाथ

उत्तराखण्डे अद्य प्रातः अष्टवादने वैदिकमन्त्रैः पारम्परिकानुष्ठानैः च भक्तानां कृते केदारनाथधाम्नः द्वाराणि उद्घाटितानि। तत्र उपस्थितानां बहुसंख्यकानां भक्तानां मध्ये उत्साहस्य भक्तेः च अद्वितीयः संगमः दृष्टः। अस्मिन् अवसरे उदग्रविमानेन मन्दिरे पुष्पवृष्टिः अभवत्। प्रथमा पूजा प्रधानमन्त्रिणः नरेन्द्रमोदिनः कृते आसीत्। मुख्यमन्त्री पुष्करसिंहधामी अपि अस्मिन् अवसरे उपस्थितः आसीत्।

---

## ऋतु-विज्ञान

भारतीय-ऋतु-विज्ञान-विभागेन आगामि दिन-द्वयोः राष्ट्रीय-राजधानी-प्रदेशे ऊष्णलहर्याः कृते प्रति 'पीतवर्णिय-संचेतना' प्रसारितास्ति। विभागेन पूर्वानुमितं कृतम् यत् आगामि दिन-द्वयोः हरियाणा-चण्डीगढे-पंजाब-उत्तरप्रदेश-मध्यप्रदेश, छत्तीसगढ-राज्येषु च ऊष्णतरंग प्रवर्तिष्यते। तथैव ओडिशा-राजस्थान-पश्चिमवङ्ग-राज्येषु च एतादृशी स्थितिः अपेक्ष्यते।

---

## भूदिवसः

पर्यावरणसंरक्षणस्य समर्थनार्थम् अद्य सम्पूर्णे विश्वे 'भूदिवसः' आचर्यते। प्रथमवारं सप्तत्यधिक-नवदशशततमे वर्षे आचर्यमाणः अयं दिवसः, नवषष्ट्यधिक-नवदशशततमे वर्षे यूनेस्को-सम्मेलने प्रस्तावितः, अयं दिवसः पृथिव्याः संरक्षणस्य आवश्यकतायाः विषये जनानाम् अवधानम् आकर्षयति। उपराष्ट्रपतिः सी.पी. राधाकृष्णन्-वर्यः नागरिकान् अस्य ग्रहस्य रक्षणार्थं स्वस्य प्रतिबद्धतां पुनरुद्घाटयितुं प्रार्थितवान्। प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् मानवस्य कल्याणं भूमेः संरक्षणे अवलम्बते। अस्मिन् अवसरे, आकाशवाणी-वार्ता-सेवा-प्रभागस्य महानिदेशकः धीरज् एम्. काकडिया नवदेहल्याम् आकाशवाणी-भवने अधिकारिभ्यः कर्मचारिभ्यः च पर्यावरणसंरक्षणाय प्रतिज्ञां कारितवान्।

---

## महिला-क्रिकेट-स्पर्धा

महिला-क्रिकेट-क्रीडायाम् अद्य रात्रौ जोहान्सबर्ग-नगरस्य वाण्डरर्स-क्रीडाङ्गणे पञ्च-क्रीडा-श्रृङ्खलायाः तृतीयायां विंशतिप्रतिविंशति-अन्ताराष्ट्रीय-क्रीडायां भारतं दक्षिण-आफ्रिका-देशेन सह स्पर्धिष्यति। एषा क्रीडा भारतीय-समयानुसारं रात्रौ सार्ध-नववादने आरभ्यते।

---

## आईपीएल

आईपीएल क्रिकेट-स्पर्धायां लखनऊ-सुपर-जायन्ट्स-दलं राजस्थान-रॉयल्स दलेन सह स्पर्धिष्यति। स्पर्धा सायं सार्ध सप्तवादने आरभ्यते।

।। इति वार्ता: ।।